श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ पन्निरुनामम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पन्निरुनामम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रीकेशवो दिशि हरेरलिके च पाति
दीप्तश्चतुर्भिररिभिस्त्वधिकोऽनवद्यम्।
वेदैस्सुवर्णनगवत् हरितारुणो मां
आशाधिकाजमखवेदिभवोऽद्भुतो हि ॥ **1** ॥

मदावलधराधरस्थितवलाहको वार्षुकः
धृताग्र्यचतुरम्बुजोऽद्भुतकरो हि नारायणः।
स पाशिदिशि चोदरे रुचिरनीलपाथोदवत्
वितीर्य कृपया श्रुतीरवति मां स्वरक्ष्यं विभुः ॥ **2** ॥

नाथो दूतोऽप्यनादिद्विरदगिरिमहो माधव श्चित्रचर्यः
प्रीत्योरस्यूर्ध्वभागे चतसृभिरसमाभिर्गदाभिस्समेतः।
देवाधीशानरत्नप्रभ इह विकसत्पुष्पयोषाविभूषः
बुद्धौ नस्सम्प्रविश्य स्वय मधिकदयो वत्सलो रक्षतीशः ॥ **3** ॥

गोविन्द श्शिशिरेन्दुभा धृतचतुश्चापश्च पापापहा
पाथोजासनसेवितः करिमहाद्रीशः शुभप्रेरकः।
ग्रीवायाः पुरतश्च दक्षिणदिशि स्थित्वा दयालुः प्रभुः
कर्मोन्मूल्य नियोज्य नश्च परिपात्यात्मीयसेवाविधौ ॥ **4** ॥

विष्णुर्दक्षिणकुक्षिभाग मविहायैवोत्तराशां तथा !
निष्यन्दन्मधुफुल्लपद्मसुमनः किञ्जल्कवर्णाकृतिः।
हस्तालङ्कृतिभिर्भिनत्ति सकलं पापं चतुर्भिर्हलैः
राजत्सान्द्रपलाशिषण्डकरिगिर्यूर्ध्वस्थकल्पद्रुमः॥ 5॥

माध्वीपूर्णसुवृक्षकोपवनके नागाद्रिशीर्षे स्थितः
वर्षी सन् मधुसूदनो दिशि शुचैः बाहौ च मे दक्षिणे।
सर्वोद्गीतरमाधिवासिकमलश्रीः पुर्वकर्मानुगं
पापौघं मुसलैश्चतुर्भिरिह नः सम्मर्द्य संरक्षति॥ 6॥

त्रिविक्रम इहेशिता करिगिरौ वसन्निष्टदः
ज्वलज्ज्वलनभास्वरो वरदराज उत्कोशितान्।
विधृत्य विहरत्यसीन् निजकरैस्समुज्जृम्भितः
विवृद्धबलरक्षसां दिशि च मे गले दक्षिणे॥ 7॥

वाग्देवीसमुपासितस्य चतुरास्यस्याध्वरे चोदितः
स्वामी वामन आददान उदरं वामं च वायोर्दिशम्।
धामत्वेन युवार्कसन्निभतनुः क्षेमाङ्करो नः प्लवः
वज्रैस्तैश्च चतुर्भिरायुधवरैर्देवश्चकास्ते परः॥ 8॥

पूर्णो भव्यगुणै रिभाद्रिशिखरेऽपूर्णामृतः श्रीधरः
स्वीकृत्योचितधाम वामभुज मप्यैशीं दिशं चाच्युतः।
सन्धोर्येतरदुर्धरांश्च चतुरस्तान् पट्टसाख्यानसीन्
राजत्पाण्डरपद्मसन्निभतनुर्भीतिं भिनत्तीह नः॥ 9॥

रोधस्यत्यन्तहृद्ये सुरभितमहितस्रोतसो वेगवत्याः
नागाद्रीशो ह्यवाच्यां दिशिनृपतिवरैस्सेवितोऽत्यादरेण।
तेनं ग्रामस्थसाङ्गश्रुतिविदभिजनेशो हृषीकेश एषः
विद्युद्भा वामकण्ठे ममच धृतचतुर्मुद्गरः पात्यधश्च॥ 10॥

संराजत्काञ्चन श्रीवरणपरिवृतानेकपाहार्ययोधः
स्वामीनः पद्मनाभो दृढ मधिहृदयः पृष्ठदेशे स्थितश्च।
सत्याकारोऽभिकाङ्क्ष्यो रुचिररुचिसहस्रार्कवत् रम्यहस्तैः
धृत्वा पञ्चायुधानि स्वयमवति वदन् माच भैषीरितीह॥ **11**॥

महामोहापोहक्षमवरणकाञ्चीमरकतः
प्रभुश्चैको दामोदर इह भवेत् किन्विह गले।
प्रतीचीने मूर्तेर्बहिरप गतोऽन्तश्च वरदः
छिनत्ति व्यामोहं दिनमणिनिभश्च स्वय महो॥ **12**॥

नामानि द्वादशैतान्यविनिकटचराण्येव भक्तेरधीत्य
भ्राम्याद्वादार्थितन्त्रोद्भिदलनविजयिन्यात्मनि ध्यायतां च।
श्रीमन्नागाद्रिभूषाञ्चितपुरवरदं संश्रितानां प्रभुं नः
गाथाश्चैतास्सुभोम्याः परमपदनिदानं हि सिध्यन्ति चार्थाः॥ **13**॥

श्रीमते निगमान्त महादेशिकाय नमः

वेदान्तार्यगुरूत्तमा अभिदधुर्लोकोपदेशेच्छया
गाधा द्वादशनामवैभवजुषः पुण्ड्राधिदेवाञ्चिताः।
अर्थं देशगिरा गिरा सुमनसां श्लोकांश्च तासां पुनः
श्रीमद्देशिकवर्य एव कृपया गोपालतोऽकारयत्॥

श्रीदेशिकप्रबन्धस्थः भागो द्वादशनामकः।
सार्थः संश्लोकितष्चाप पूर्णतां प्रीयतां गुरुः॥

॥ इति द्वादशनाम प्रबन्धः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥